खलम् । हूणावरोधवैधव्यदीक्षादानं व्यधत्त सः NavaSāC. 11. 90.

¹अकच् (akac) a Taddhita suffix in P., the *c* as an indicatory letter accenting it on the final syllable and the (k)*a* for ease of pronunciation अकच्यकारस्योच्चारणार्थतया कशब्दाभावात् 'न यासयोः' (P. vii. 3. 45) इति ज्ञापकेन वर्णग्रहणमित्येव ज्ञाप्यते LaS'abdeS'e. i. 375. 4, to explain the *k*-extension in the pronouns and some indeclinables, inserted before the final vowel अव्ययसर्वनाम्नामकच् प्राक् टेः P. v. 3. 71, also to explain such a *k* in some verbal forms by implication in P. but explicitly in तिङ्संख्यानामचोऽन्त्यात् पूर्वोऽकच् CāndraVyā. iv. 3. 56; उभयस्य सर्वनामत्वेऽकजर्थः Vār. 7 *on* P. i. 1. 27; अकच्प्रकरणेऽव्ययसर्वनाम्नोः सर्वनामाव्ययधातुविधाउपसंख्यानम् Vār. 5 *on* P. i. 1. 72; भवतोऽकच्छेषात्वानि (प्रयोजनानि) Vār. 11 *on* P. i. 1. 27; उभशब्दोऽयं द्विवचनटाब्विषय इत्युक्तम् । तत्राकचि सत्यकचस्तन्मध्यपतितत्वाच्छक्यत एतद् वक्तुं द्विवचनपरोऽयमिति MahāBh. i. 89. 15 (*on* i. 1. 27); ककारान्तस्य प्रातिपदिकस्याकच्सन्नियोगेन दकारादेशो भवति KāśiVr. *on* v. 3. 72; ज्ञापकस्य प्रयोजनम् अकज्वतां सर्वनामसंज्ञा सर्वादीनाम् Nyās. iii. 626. 5 (*on* vii. 1. 11); ननु चाव्ययनिबन्धनमकजादिकार्यमस्त्येव Nyās. i. 85. 1 (*on* i. 1. 41); कुत्साद्यर्थविवक्षायां यस्यामवस्थायामकज्विधि प्रति संज्ञा स्यात् PadMañ. *on* KāśiVr. *on* i. 1. 32; तेन भिन्धकीत्यत्र परत्वात् धिभावे कृते पुनरकच् क्रियते PariVr.(Sī.) 43. 8 (*on* i. 4. 21); अकच्सहितस्याप्ययमादेशः Prakri-Kau. i. 219. 2; i. 142. 3; i. 930. 2; तद्धितयोगमात्रविवक्षायां तत्त्वे पचतकीत्यत्र अकच्प्रत्ययुक्तेऽपि तदापत्तेः (प्रातिपदिकसंज्ञापत्तेः) BhāṭṭCin. 89. 7 (*on* i. 1. 4); चकारोऽकच्संनियोगार्थं इत्यभिप्रेत्याह अकच्संबन्ध इति Prasā. i. 930. 18; 'एषको रुद्रः' ···ननु चाकच्सहितं शब्दान्तरमेतत् Prasā. i. 114. 19; स्वशब्दस्त्वनुपसर्जनमात्मीयवाची अकजर्हः SiddhāKau. 115B. 5; विशिष्य विधानात्तु बहुचः पुरस्तादकचः प्रकृतिमध्ये शबादेः प्रकृतिप्रत्यययोर्मध्य उत्पत्तिर्नान्यत्र VaiyāBhū. 148. 1; 'अज्ञाते' इत्यादौ तु वाक्यमेदेनाकचोऽपि विधानं बोध्यम् LaS'abdeS'e. ii. 376. 1.

²अकच् (a-kac) not containing *kac*, without *kac* (= *can* cf. P. vii. 3. 56) हेरकचि JaineVyā. v. 2. 61 (comm. हिनोतेर्हकारस्य चात् परस्य अकचि कुत्वं भवति । प्रजिघाय ।···अकचीति किम् । प्राजीहयत् ।)

¹अकच (a-kaca) *adj.* hairless, bald कण्डूतिस्त्वकचादपैति शिरसः Tāpa-Va. 3. 3.

²अकच (akaca) *m. ketu*, the dragon's tail, the descending node उपप्लवोऽकचः केतुराश्लेषाभव आह्निकः Hārāva. 37(L)

अकच्चित् (a-kaccit) [Loc. in *-ti* excludes the ending *d*] without the use of the word *kaccit*, in the absence of *kaccit* कामप्रवेदनेऽकच्चिति P. iii. 3. 153; इच्छोद्बोधेऽकच्चिति JaineVyā. ii. 3. 129 (133. 33); कामाविष्कारेऽकच्चिति S'ākaṭāVyā. iv. 4. 124; कामोक्तावकच्चिति SiddhaHe. v. 4. 26; कामोक्तेऽकच्चिति । कामं भजेद्भवान् भर्गं कच्चिदर्चिष्यते शिवम् MugdhaBo. 25. 20 (145. 21)

अकज्जल (a-kajjala) *adj.* [*f.* -ā] **A** not streaked with collyrium दृशौ किमकज्जले SaraKanthā. 523. 16 = SubhāRaK. 22. 32; **B** emitting no soot, sootless (क्षोणीपतितनयः···) अकज्जलैर्ज्वलद्भिर्मणिक्यदीपैः समन्तादुत्सारिततमोवितानम्···वासभवनं विवेश TilaMañ. 174. 12.

अकञ् (akañ) the secondary suffix *-aka* used with various bases in various senses (e. g. 'collective', 'belonging to', 'country of' 'grown or sown in', 'academic or hereditary relationship' etc.; often corresponding to *vuñ* or *thak* of P.) गोत्रोक्षवत्सोष्ट्रवृद्धाजोरभ्रमनुष्यराजराजन्यराजपुत्रादकञ् SiddhaHe. vi. 2. 12; vi. 2. 36; vi. 2. 66; vi. 3. 21; vi. 3. 41; vi. 3. 100; vi. 3. 115; vi. 3. 119; vi. 3. 150; vi. 3. 168; vi. 3. 173; vi. 3. 194; vi. 3. 208; vii. 1. 72.

अकञ्चुक (a-kañcuka) *adj.* **A** without a corslet or bodice आचार्यास्तेषु···भवेयुः···अकञ्चुकाः PāraS. 17. 619; अकञ्चुकमुरःस्थलं···योषिताम् Rāṣṭrau-15. 14; (कापि)···स्थितौत्सुक्यादकञ्चुका NemiNir. 12. 53; **B** (a pearl) having no shell or coating (= polished?) दुर्मुख, दृष्टमेभिः सारतरं मया लब्धमरवरकमर्ककर्करमकञ्चुकमयमकमरक्कमकर्मकमसितं च मे मुक्ताजातमिदम् AvantiKa. 62. 9; **C** having the husk removed (said of the ingredient of a tablet) (अथ तद् (अस्थिसंहार)वटिकाया निर्माणविधिं···आह) काण्डं त्वग्विरहितमस्थिशृङ्खलाया माषाद्रै(? माषार्धं) द्विदलमकञ्चुकं तदर्धम् । संपिष्टं सुतनु ततस्तिलस्य तैले संपक्वं वटकमतीव वातहारि BhāvPra. (Bhā.) vi (4). 227.

अकट् (akaṭ) the primary suffix *-aka* (affixed to the roots *nṛt-*, *khan-* and *rañj-* to form a noun denoting 'the performer of a particular act as a profession') (= *ṣvun* of P.) नृत्खन्रञ्जः शिल्पिन्यकट् SiddhaHe. v. 1. 65; अकट्यिनोश्च रञ्जेः SiddhaHe. iv. 2. 50.

अकट (akaṭa) *m.* [a Prākritization of अकृत like विकट of विकृत cf. Marāṭhī अकटोविकट] not formed, unmade, unfinished अकटो विकटश्चैव कुन्तीपुत्रो विनायकः Nāṭa. 9. 6.

अकटकाटोप (a-kaṭakāṭopa) *adj.* without the ado or pomp of an army, without an army समानोदर्यवान्धीमानसोदर्यैश्च सेवितः । स प्रापाकटकाटोपः शृण्वञ्जन्यं मनःप्रियम् । Rāvaṇā. 15. 56.

अकटाक्षता (akaṭākṣa-tā) *f.* absence of glancing capacity प्रलेपनाख्यैः पञ्चभिः कक्षदोषैरकटाक्षता (i. e. मत्तवारणस्य) AvantiKa. 104. 6.

अकटाक्षनिरीक्षण (a-kaṭākṣanirīkṣaṇa) *n.* looking without a side-glance यस्य (जिनस्य)···शास्ति कामज्वरापायमकटाक्षनिरीक्षणम् MahāP. 21. 263.

अकटु (a-kaṭu) *adj.* not acrid or pungent पर्णं पुराणमकटुक्षुल्लकं तनु पाण्डुरम् । विशेषाद्गुणवद्वेद्यम् BhāvPra.(Bhā.) 5. 186; *n.* without camphor अकटुस्नेहलवणमकृतं कृतमन्यथा ParyāRaMā. 1686.

अकटुक (a-kaṭuka) *adj.* [*f.* -ā] **A** not acrid or pungent अकटुका यत्रौषधयः स्युः GobhiGS. iv. 7. 4; **B** not having bitterness (in mind) चरेद्धर्मानकटुकः MahāBhā. xii. 71. 3 (Nīla. अकटुकः रागद्वेषविहीनः)

अकटुकोपाय (akaṭukopāya) *adj.* whose means are not bitter, or not unpleasant न्यरुणत्···यदुवीरान्शौरिरकटुकोपायः YudhiVi. 2. 35. (comm. अकटुकः सामोपेतः)

अकटुफल (akaṭu-phala) *m.* [PW. a certain plant. Gal.]

अकठ (a-kaṭha) *m.* who is not a follower of the Vedic school of the Kaṭhas कठनियमाङ्गीकारस्तु अधिवाक्यस्य कठाकठसाधारण्यात् कठानां वैकल्पिकप्राप्त्यभावेन समाख्यायाः तन्नियामकत्वायोगात् अकठव्यावृत्त्यर्थकत्वे च परिसंख्याफलकत्वापत्तेः···अयुक्तः MīmāKau. ii(1). 122. 17 (*on* ii. 4. 19).

अकठिन (a-kaṭhina) *adj.* not hard, soft, tender सुस्पर्शाकठिनापरुषाण्यङ्गानि यस्याः सा ManuBh. i. 212. 3 (*on* 3. 10); सुसिद्धमदग्धमकठिनमन्नं भवति HārLa. 166. 11; (चरुः) अकठिनः कोमलः VīraMi. (Paribhāṣā) 109. 6; GobhiSm. 2. 72; ईषदुन्नतमुदरं···अकठिनं···प्रशस्यते KāśyaS. 48. 6; मृदु वज्रे कोमले तु त्रि स्यादकठिनेऽपि च NānārthāSaṁ. i. 130. 1024; मसृणोऽकठिने स्निग्धे AnekāSaṁ. 3. 209.

अकठिनत्व (a-kaṭhinatva) *n.* absence of hardness, softness द्वितीयमासीयगर्भो रज एव किंचिद्विलक्षणमकठिनत्वात् HārLa. 69. 11.

अकठिनभाव (akaṭhina-bhāva) *m.* looseness, soft condition अथ (वारणस्य) कण्ठे···त्रिकटुकयुक्तेन हस्तेन श्लेष्माणं निर्गत्य विलापयेत् । अकठिनभावा न विद्येत(? रन्) Hastyāyur. 2. 30 (231. 13)

अकठिनहृदय (akaṭhina-hṛdaya) *adj.* whose heart is not stiff i. e. tender-hearted किं पुनरकठिनहृदयाः स्वल्पावगताः स्त्रियः DhūrtaViSaṁ. 18. 10.

अकठिनहृदयत्व (akaṭhinahṛdaya-tva) *n.* softheartedness अकठिनहृदयत्वं मृदुता CaturCin. iii(1). 393. 18 = VīraMi. (S'rāddha.) 68. 19.

अकठोर (a-kaṭhora) *adj.* **A** soft, tender अकठोरशेफालिकाकुसुमनालपिञ्जरेण···चञ्चुपुटेन···फलशकलानि···मह्यमदात् Kād. 25. 11; 138. 1; अकठोररम्भागर्भकोमलैः···वासोभिः HarṣaC. 203. 1; पान्तु त्वामकठोरकेतकशिखासंदिग्धमुग्धेन्दवो भूतेशस्य···जटाः MālaMā. 1. 2 = SabhāRaK. 4. 15; TilaMañ. 36. 8; ताडीदलं यदकठोरमिदं···कस्याश्चिदेष गलितस्तदनङ्गलेखः SaduktiKa. 137. 31; अकठोरशिरीषकोमलैः कथमङ्गैः प्रतियोत्स्यते हरिः Yādavā. 9. 48; **B** young, not fully grown अकठोरहारीतहरितप्रभं रम्भागृहमपश्यत् TilaMañ. 229. 3; ते संप्रत्यकठोरवारणवधूदन्ताङ्कुरस्पर्धिनो ··· बिसिनीकन्दाग्रिमग्रन्थयः VakroJī. 44. 18 = SubhāRaK. 11. 19. = SaduktiKa. 177. 31; तत्राकठोरशुककण्ठशिरीषपुष्पखद्योतपृष्ठवरशाद्वलशैवलानाम् ।···मरकताः शुभदा भवन्ति YuktiKa. 128. 16; **C** mild, gentle, not harsh अरुणितमकठोरैर्वेश्म काश्मीरजाम्भःस्नपितमिव तदेतद्धानुभिर्भाति भानोः S'iśuVa. 11. 53; अत्र(?)तीक्ष्णेनाकठोरेण चायुधेन पुष्पधन्वा···विजयते SaraKanthā. 505. 8; मृदुरकठोरः (ब्रह्मचारी) Aparā. 1055. 17 (*on* 3. 243); स्तनतटमकठोरं सर्वमप्येतदस्याः JādaPa. 3. 44.

अकठोरकर (akaṭhora-kara) *adj.* whose taxes are not severe or hard to bear अकठोरकरस्यास्य तुल्यः कथमिवार्यमा VasaViKā. 4. 11.

अकठोरगिर् (akaṭhora-gir) *adj.* one whose speech is not harsh (i. e. is pleasant) अकठोरगिरः पेतुः पुरः खेचरबन्दिनः PāṇḍaC. 5. 165.

अकठोरतर (akaṭhora-tara) *adj.* very soft or tender तालीदलं यदकठोरतरं यदत्र···कस्याश्चिदेष गलितस्तदनङ्गलेखः ViddhaS'āla. 3. 21.

अकठोरता (akaṭhora-tā) *f.* softness, tenderness अस्याः··· । अङ्गानामकठोरता यदि दृषत्प्रायैव सा मालती Kuval. 66 (85).

अकठोरतारस्वर (akaṭhora-tārasvara) *adj.* soft hightone अकठोरतारस्वरम्···अभूत् तत् किमपि गीतम् NalaCa. 6. 42 (34)

अकठोरधामन् (akaṭhora-dhāman) *adj.* one whose lustre is not hot (the moon) कलामिवाधर्मकठोरधाम्नः···प्रैक्षन्त शुद्धान्तमृगीदृशस्ताम् Yādavā. 12. 11.

अकठोरम् (a-kaṭhoram) *adv.* in a soft manner अकठोरं···प्रियंवदिकया